ढुण्ढो जटिली भीमा द्विजिह्वः पृथिवी सती।
कोरगिरिः चमा कान्तिर्नाभिः ख्याती च
लोचनम्॥"
इति नानातन्त्रशास्त्रम्॥
(पद्यादौ अस्य प्रथमोपन्यासे फलं शोभा।
यदुक्तं वृत्तरत्नाकरटीकायाम्।
"डः शोभां ढो विशोभां भ्रमणमथ च णस्तस्तु
खं यस्तु युद्धम्॥")

डः, पुं, (डयते उड्डीयते भक्तानां हृदयाकाशे यः। डी+बाहुलकात् डः।) शिवः। (डीयते आकाशमार्गे नभोगुणत्वादिति। डी+डः।) शब्दः। त्रासः। इत्येकाचरकोषः॥ वाड़वाग्निः। इति मेदिनी। डे, १॥

डङ्गरी, स्त्री, (डं त्वरीचकादिजनितत्रासं गिरति नाशयतीति। गॄ+अच्। निपातनात् मुमागमः। ततो ङीष्।) फलविशेषः। तत्पर्य्यायः। डाङ्गरी २ दीर्घवृन्ताः ३ दङ्करी ४ डङ्गारी ५ नामशुण्ठी ६ गजदन्तफला ७। अस्या गुणाः। शीतलत्वम्। रुचिकारित्वम्। दाहपित्तास्रदोषाश्मरीआध्मानरोधनाशित्वम्। सर्पगत्वम्। गौल्यत्वञ्च। इति राजनिर्घण्टः॥

डङ्गारी, स्त्री, (डङ्गरी पृषोदरादित्वादात्वम्।) डङ्गरीफलम्। इति राजनिर्घण्टः॥

डप, इ क ड न संहतौ। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-उभं च-सकं-सेट्।) मूर्द्धन्यवर्गतृतीयादिः। इ क ड, डम्पयते। न, डम्पयति डम्पयते। अयमात्मनेपदीत्यन्ये। संहती राशीकरणम्। इति दुर्गादासः॥

डप, क ङ न संहतौ। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-उभं च-सकं सेट्।) मूर्द्धन्यवर्गतृतीयादिः। क ङ, डापयते। न, डापयति डापयते। पुनःपाठान्नेदनुबन्धः। अयं आत्मनेपदीत्यन्ये। संहती राशीकरणम्। इति दुर्गादासः॥

डब, इ क न नोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) मूर्द्धन्यवर्गतृतीयादिः। इ क, डम्बयति। नोदः प्रेरणम्। इति दुर्गादासः॥

डभ, इ क न सङ्घे। इति कविकल्पद्रुमः॥ (चुरां-उभं-अकं-सेट्।) मूर्द्धन्यवर्गतृतीयादिः। इ क, डम्भयति डम्भयते। अयमात्मनेपदीति केचित्। सङ्घो राशीकरणम्। इति दुर्गादासः॥

डमः, पुं, (डं नीचयोनित्वात् भीतिं मातीति। मा+कः।) वर्णसङ्करजातिविशेषः। डोम इति भाषा। स चाण्डाल्यां लेटात् जातः। इति ब्रह्मवैवर्त्तपुराणम्॥

डमरं, क्ली, (म्र+भावे अप्। मरं पलायनं धातूनामनेकार्थत्वात्। डेन त्रासेन मरम्।) भीत्या पलायनम्। तत्पर्य्यायः। शृगालिका २ विद्रवः ३ डिम्बः ४। इति हारावली।६६॥

डमरः, पुं, (डेन भयेन मरो म्रतिविर यत्र।) परचक्रादिभयम्। अस्वकलहः। इत्यमरटीकायां स्वामी॥ तत्पर्य्यायः। डिम्बम् २ विप्लवः ३। इत्यमरः। ३। २। १४॥ डिम्बः ४ विम्बः ५ डामरः ६। इति भरतः॥ (यथाह गर्गः।
"तत्तच्चयोऽशिखिकेतुः स तु रूक्षः शुक्लयावहः
प्रोक्तः।
क्षितिवसाटक प्राप्तौ शास्त्राख्यो डमर-
मरकाय॥")

डमरुः, पुं, (डमित्यव्यक्तशब्दं ऋच्छतीति। ऋ+"मृगय्वादयश्च।" उणां १। ३८। इति कुप्रत्ययेन निपातनात् साधुः।) वाद्यभेदः। इत्यमरः। १। ७। ८॥ कपालियोगिवाद्यम्। इति भरतः॥ "चीणमध्यो गुटिकाद्वयालम्बितः। इति सारसुन्दरी॥ (यथा, योगसारे २ परिच्छेदे।
"वादयन् डमरुं योगी यत्र कुत्राश्रमे स्थितः॥")
चमत्कारः। इति त्रिकाण्डशेषः॥

डयनं, क्ली, (डीयते आकाशमार्गे गम्यतेऽनेनेति। डी+करणे ल्युट्।) कर्णीरथः। (डी ङ नभोगतौ+भावे ल्युट्।) नभोगतिः। इति हेमचन्द्रः। ४। ३८४॥

डल्लकं, क्ली, वंशादिनिर्म्मितपात्रम्। डाला इति भाषा। यथा,—
"त्रिंशतञ्च घटाधिकं डल्लकं वस्त्रसंयुतम्।
सभोज्यं सोपवीतञ्च सोपस्कारं मनोहरम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

डवित्थः, पुं, काष्ठमयमृगः। यथा,—
"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः॥"
इति सुपद्मव्याकरणे विभक्तिपादः॥
(द्रव्यवाचिसंज्ञाशब्दविशेषः। यथा साहित्यदर्पणे। "द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः॥")

डहुः, पुं, (दहति तापयति सर्व्वशरीरमिति। दह+मृगय्वादित्वात् कुप्रत्ययेन निपातनात् साधुः।) वृक्षविशेषः। ढेउया इति मादार इति च भाषा। तत्पर्य्यायः। लकुचः २ लिकुचः ३। इत्यमरः। २। ४। ६०॥ अस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। त्रिदोषशुक्रदुष्टिकारित्वञ्च। इति राजवल्लभः॥

डहूः, पुं, (डहुः। पृषोदरादित्वात् दीर्घः।) डहुः। इति शब्दरत्नावली॥

डा, स्त्री, (डीयते नभोमार्गे गच्छतीति। डी+अन्येष्वपीति डः स्त्रियां टाप्।) डाकिनी। इति मेदिनी। डे, १॥

डाकिनी, स्त्री, (डाय भयदानाय अकति कुटिलं व्रजतीति। अक वक्रगतौ+इनिः। ततो ङीप्।) कालीगणविशेषः। यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"सार्द्धञ्च डाकिनीनाञ्च विकटानां त्रिकोटिभिः॥"
(डाकानां समूहः। "खलादिभ्य इनिर्व्वक्तव्यः।" ४। २। ५१। इत्यस्य वार्त्तिकोक्त्या इनिः। डाकानां समूहः। इति सिद्धान्तकौमुदी॥)

डाङ्गरी, स्त्री, (डङ्गरी पृषोदरादित्वादात्वम्।) डङ्गरीफलम्। इति राजनिर्घण्टः॥

डामरः, पुं, शिवोक्तशास्त्रविशेषः। (यथा, काशीखण्डे। २६। ७०।
"डमड्डुमरुहस्ता च डामरोक्तमहाण्डका॥"
"डामरो डामरकल्पो नवाचरदेवीमन्त्रस्य प्रतिपादको यन्थो महाराष्ट्रे सुप्रसिद्धस्तत्रोक्तं प्रतिपादितं मन्त्रमयं महच्छरीरं यस्याः॥"
इति तट्टीका॥) स तु षड्विधः। तेषां नामानि श्लोकसंख्याश्च यथा। योगडामरः २३,५३३। शिवडामरः ११,००७। दुर्गाडामरः ११,५०३। सारस्वतडामरः ६,६०५। ब्रह्मडामरः ७,१०५। गन्धर्व्वडामरः ६०,०६०। इति वाराहीतन्त्रम्॥ डमरः। इत्यमरटीकायां भरतः॥ चमत्कारः। यथा। भूतानां डामरश्चमत्कारोऽत्रेति भूतडामरशब्दनिर्व्वचने निबन्धकारः॥ (गर्व्वः। आटोपः। यथा, गीतगोविन्दे। १२। २२।
"मम रुचिरे चिकुरे कुरु मानद! मानसज-
ध्वजचामरे।
रतिगलिते ललिते कुसुमानि शिखण्डि-
शिखण्डकडामरे॥"
कोटचक्रविशेषः। यथा, समयामृते।
"अथातः संप्रवक्ष्यामि कोटचक्रमिहाष्टधा॥"
इत्युपक्रम्य,—
"पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः॥"
इत्युक्तवान्॥
अस्य विशेषविवृतिः चक्रशब्दे द्रष्टव्या॥ * ॥
क्षेत्रपालविशेषः। यथा, प्रयोगसारे।
"भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः॥"
इत्युपक्रम्य,—
"टङ्कपाणिस्तथा चान्ध्रतानवस्तुश्च डामरः॥")

डालिमः, पुं, (दाड़िमः पृषोदरादित्वात् साधुः।) दालिमः। इत्यमरटीकायां भरतः॥

डाहलः, पुं, त्रिपुरदेशः। इति भूरिप्रयोगः॥

डाहुकः, पुं, दात्यूहपक्षी। इति जटाधरः॥

डिङ्गरः, पुं, डङ्गरः। चेपः। खलः। धूर्त्तः। सेवकः। इति शब्दरत्नावली॥

डिण्डिमः, पुं, (डिण्डीति शब्दं मातीति। मा+कः।) वाद्यप्रभेदः। इत्यमरः। १। ७। ८॥ ढेङ्गरीति ख्यातः। इति भरतः॥ माहेश्वरडम्फीति ख्यातः। इति सारसुन्दरी॥ (यथा, महाभारते। ७। १६३। ४४।
"भेरीश्चाभ्यहनन् हृष्टा डिण्डिमांश्च सहस्रशः॥"
"डिण्डिम इव आकृतिरस्त्यस्येति। अर्श आदित्वादच्।) लक्ष्मपाकफलः। इति शब्दचन्द्रिका॥ पानी आमला इति भाषा॥

डिण्डिरः, पुं, (हिण्डिरः पृषोदरादित्वात् हस्य डः।) समुद्रफेनः। इति हेमचन्द्रः। ४। १४३॥

डिण्डिरमोदकं, क्ली, (मोदयतीति। मुद्+ण्वुल्। डिण्डिर इव मोदकम्।) गृञ्जनम्। इति राजनिर्घण्टः॥

डिण्डिशः, पुं, टिण्डिशः। टिंडश इति भाषा॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमभागे।